सरस्वती । इति शब्दरत्नावली ॥ बुद्धिर्वैदिकपर्य्यायः । केतुः १ केतः २ चेतः ३ चित्तम् ४ क्रतुः ५ असुः ६ धीः ७ शचीः ८ माया ९ वयुनम् १० अभिख्या ११ । इत्येकादश प्रज्ञानामानि । इति वेदनिघण्टौ ३ अध्यायः ॥

प्रज्ञाकायः, पुं, (प्रज्ञा काय इवास्य ।) मञ्जुघोषः । इति त्रिकाण्डशेषः ॥

प्रज्ञाचक्षुः, पुं, (प्रज्ञा एव चक्षुर्य्यस्य ।) धृतराष्ट्रः । इति शब्दरत्नावली ॥ (यथा, महाभारते । १ । १ । १४७ ।
"श्रुत्वा तु मम वाक्यानि बुद्धियुक्तानि तत्त्वतः ।
ततो ज्ञास्यसि मां सौते प्रज्ञाचक्षुषमित्युत ॥")

प्रज्ञानं, क्ली, (प्रज्ञायतेऽनेनेति । प्र + ज्ञा + ल्युट् ।) बुद्धिः । (यथा, महाभारते । ३ । १८५ । १६ ।
"त्वमेव सुह्यसे मोहात् न प्रज्ञानं तवास्ति ह ॥")
चिह्नम् । इत्यमरः । ३।३।११२ ॥ (यथा, महाभारते । ५ । ३३ । २६ ।
"नासं पृष्टो ह्युपयुङ्क्ते परार्थे
तत् प्रज्ञानं प्रथमं पण्डितस्य ॥"
चैतन्यम् । तल्लक्षणं यथा, पञ्चतन्त्रे । ५ । १ ।
"येनेक्षते शृणोतीदं जिघ्रति व्याकरोति च ।
स्वाद्वस्वादू विजानाति तत् प्रज्ञानमुदीरितम् ॥")
पण्डिते, त्रि । इति भरतद्विरूपकोषः ॥

प्रज्ञी, [न्] त्रि, (प्रज्ञास्त्यस्येति । प्रज्ञा + इनिः ।) पण्डितः । इति भरतद्विरूपकोषः ॥

प्रज्ञुः, पुं, (प्रगते जानुनी यस्य । "प्रसम्भ्यां जानुनोर्ज्ञुः ।" ५ । ४ । १२९ । इति ज्ञुः ।) प्रगतजानुकः । इत्यमरः । २ । ६ । ४७ ॥ यस्य जानुनोर्मध्ये नित्यं कादाचित्कं वा महदन्तरालं तस्मिन् द्वयम् । इति भरतः ॥

प्रज्वलितः, त्रि, (प्र + ज्वल + क्तः ।) प्रकृष्टज्वलनविशिष्टः । यथा,—
"अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम् ।
सुवर्णवर्णममलं समिद्धं सर्व्वतोमुखम् ॥"
इति भवदेवभट्टः ॥

प्रडीनं, क्ली, (प्र + डी नभोगतौ + क्तः ।) पक्षिणां गतिविशेषः । इत्यमरः । २ । ५ । ३७ ॥ प्रथमडीनं प्रडीनं उड्डयनाय क्रमबन्धः । तिर्य्यग्गमनम् । इत्यन्ये । इति भरतः ॥

प्रणः, पुं, (प्र + "नश्च पुराणे प्रात् ।" ५ । ४ । ५ इत्यस्य वार्त्ति० इति नः ।) पुराणः । "पुराणार्थे वर्त्तमानात् प्रशब्दात् नो वक्तव्यः ।" इति सिद्धान्तकौमुदी ॥

प्रणतः, त्रि, (प्र + णम + क्तः ।) प्रकर्षेण नतः । प्रणतिविशिष्टः । यथा,—
"ध्येयं सदा परिभवघ्नमभीष्टदोहं
तीर्थास्पदं शिवविरिञ्चिनुतं शरण्यम् ।
भृत्यार्त्तिहं प्रणतपालभवाब्धिपोतं
वन्दे महापुरुष ! ते चरणारविन्दम् ॥"
इति श्रीभागवतम् ॥

प्रणतिः, स्त्री, (प्रकृष्टं नमनमिति । प्र + णम + भावे क्तिन् ।) प्रणामः । तत्पर्य्यायः । प्रणिपातः २ अनुनयः ३ । इति हेमचन्द्रः ॥ (यथा, रघौ । ११ । ८९ ।
"राघवोऽपि चरणौ तपोनिधेः
क्षम्यतामिति वदन् समस्पृशत् ।
निर्ज्जितेषु तरसा तरस्विनां
शत्रुषु प्रणतिरेव कीर्त्तये ॥")

प्रणयः, पुं, (प्रणयनम् । प्र + णी + "एरच् ।" ३ । ३ । ५६ । इति अच् ।) प्रीत्या प्रार्थनम् । तत्पर्य्यायः । प्रश्रयः २ । इत्यमरः । ३।२।२५॥ प्रसरः ३ । इति भरतः ॥ (यथा, रघौ ।२।५८ ।
"सम्बन्धमाभाषणपूर्व्वमाहु-
र्वृत्तः स नौ सङ्गतयोर्व्वनान्ते ।
तद्भूतनाथानुग ! नार्हसि त्वं
सम्बन्धिनो मे प्रणयं विहन्तुम् ॥")
प्रेम । (यथा, भगवद्गीतायाम् । ११ । ४ ।
"सखेति मत्वा प्रसभं यदुक्तं
हे कृष्ण हे यादव हे सखेति ।
अजानता महिमानं तवेदं
मया प्रमादात् प्रणयेन वापि ॥")
याच्ञा । विश्रम्भः । निर्व्वाणः । इति मेदिनी । ये, ८९ ॥

प्रणयी, पुं, (प्रणयोऽस्यास्तीति । प्रणय + इनिः ।) स्वामी । इति हेमचन्द्रः ॥ प्रणययुक्ते, त्रि । (यथा,—
"प्रणयिनि निजनाथे लज्जया मौनभावा
प्रति किमिह नवोढ़ा रौति विव्वोकधाक ॥"
इत्युद्भटः ॥)

प्रणयिनी, स्त्री, (प्रणयिन् + ङीप् ।) भार्य्या । इति हेमचन्द्रः ॥

प्रणवः, पुं, (प्रकर्षेण नूयते स्तूयते आत्मा स्वेष्टदेवता वानेनेति । प्र + णुल स्तुतौ + "ऋदोरप् ।" ३ । ३ । ५७ । इति अप् । "उपसर्गादसमासेऽपि णोपदेशस्य ।" ८ । ४ । १४ । इति णत्वम् । यद्वा, ब्रह्मविष्णुमहेशरूपत्वात् प्रणम्यते इति । प्र + णम + कर्म्मणि घञ् । संज्ञापूर्व्वकत्वात् वृद्ध्यभावः । पृषोदरादित्वात् मस्य वः ।) ॐकारः । इत्यमरः । १ । ६ । ४ ॥ तस्य पर्य्यायो यथा,—
"ॐकारः प्रणवस्तारो वेदादिर्व्वर्त्तुलो ध्रुवः ।
त्रैगुण्यं त्रिगुणो ब्रह्म सत्यो मन्त्रादिरव्ययः ॥
ब्रह्मबीजं त्रितत्त्वञ्च पञ्चरश्मिस्त्रिदैवतः ॥"
इति बीजवर्णाभिधानम् ॥
अपि च ।
"ॐकारो वर्त्तुलस्तारो वामश्च हंसकारणम् ।
मन्त्राद्यः प्रणवः सत्यं बिन्दुशक्तिस्त्रिदैवतम् ॥
सर्व्वजीवोत्पादकश्च पञ्चदेवो ध्रुवस्त्रिकः ।
सावित्री त्रिशिखो ब्रह्म त्रिगुणो गुणजीवकः ॥
आदिबीजं वेदसारो वेदबीजमतः परम् ।
पञ्चरश्मिस्त्रिकूटे च त्रिभवे भवनाशनः ॥
गायत्री बीजपञ्चांशौ मन्त्रविद्याप्रसूः प्रभुः ।
अक्षरं मातृकासूश्चानादिदैवतमोक्षदौ ॥"
इति तन्त्रम् ॥ * ॥
(यथा, महानिर्व्वाणतन्त्रे । ३ । ३२ ।
"अकारेण जगत्पाता संहर्त्ता स्यादुकारतः ।
मकारेण जगत्स्रष्टा प्रणवार्थ उदाहृतः ॥"
यथा च ।
"अकारो विष्णुरुद्दिष्ट उकारस्तु महेश्वरः ।
मकारेणोच्यते ब्रह्मा प्रणवेन त्रयो मताः ॥"
वेदस्याध्ययनारम्भे अध्ययनसमाप्तौ च ब्राह्मणस्य ॐकारोच्चारकर्त्तव्यत्वमुक्तं यथा मनौ । २ । ७४ ।
"ब्राह्मणः प्रणवं कुर्य्यादादावन्ते च सर्व्वदा ।
स्रवत्यनोङ्कृतं पूर्व्वं परस्ताच्च विशीर्य्यते ॥")
अस्योच्चारक्रमो यथा,—
"एकमेवाद्वयं ब्रह्म मायया तु चतुष्टयम् ।
रौहिणीतनयो रामः अकाराक्षरसम्भवः ॥
तैजसात्मकप्रद्युम्न उकाराक्षरसम्भवः ।
प्राज्ञात्मको निरुद्धो वै मकाराक्षरसम्भवः ।
अर्द्धमात्रात्मकः कृष्णो यस्मिन् विश्वं प्रतिष्ठितम् ॥"
इति गोपालतापनीयोपनिषत् ॥ * ॥
स च माङ्गलिकः । यथा,—
"ॐकारश्चाथ शब्दश्च द्वावेतौ ब्राह्मणः पुरा ।
कण्ठं भित्त्वा विनिर्य्यातौ तेन माङ्गलिकावुभौ ॥"
इति मुग्धबोधटीकायां दुर्गादासः ॥ * ॥
अस्य माहात्म्यं यथा,—
"विश्वपादशिरोग्रीवं विश्वेशं विश्वभावनम् ।
यत्प्राप्तये महापुण्यमोमित्येकाक्षरं जपेत् ॥
तदेवाध्ययनं तस्य स्वरूपं शृणुतः परम् ।
अकारश्च तथोकारो मकारश्चाक्षरत्रयम् ॥
एतास्तिस्रः स्मृता मात्राः सात्त्वराजसतामसाः ।
निर्गुणा योगिगम्यान्या अर्द्धमात्रा तु सा स्मृता ॥
गान्धारीति च विज्ञेया गान्धारस्वरसंश्रया ।
पिपीलिकागतिस्पर्शा प्रयुक्ता मूर्द्ध्नि लक्ष्यते ॥
यदा प्रयुक्त ॐकारः प्रतिनिर्य्याति मूर्द्धनि ।
तदोङ्कारमयो योगी अक्षरे त्वक्षरो भवेत् ॥
प्राणो धनुः शरश्चात्मा ब्रह्म वेध्यमुदाहृतम् ।
अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत् ॥
ओमित्येते त्रयो देवास्त्रयो लोकास्त्रयोऽग्नयः ।
विष्णुक्रमास्त्रयश्चैव ऋक्सामानि यजूंषि च ॥
मात्राश्चार्द्धञ्च तस्रस्तु विज्ञेयाः परमार्थतः ।
तत्र युक्तश्च यो योगी स तल्लयमवाप्नुयात् ॥
अकारस्त्वत्र भूर्लोक उकारश्चोच्यते भुवः ।
सव्यञ्जनो मकारश्च स्वर्लोकः परिकल्प्यते ॥
व्यक्ता तु प्रथमा मात्रा द्वितीयाव्यक्तसंज्ञिका ।
मात्रा तृतीया चिच्छक्तिरर्द्धमात्रा परं पदम् ॥
अनेनैव क्रमेणैता विज्ञेया योगभूमयः ।
ओमित्युच्चारणात् सर्व्वं गृहीतं सदसद्भवेत् ॥
ह्रस्वा तु प्रथमा मात्रा द्वितीया दीर्घसंयुता ।
तृतीया तु प्लुतार्द्धाख्या वचसः सा त्वगोचरे ॥
इत्येतदक्षरं ब्रह्म परमोङ्कारसंज्ञितम् ।
यस्तं वेद नरः सम्यक् तथा ध्यायति वा पुनः ॥
संसारचक्रमुत्सृज्य त्यक्तत्रिविधबन्धनः ।
प्राप्नोति ब्रह्मनिलयं परमं परमात्मनि ॥